नियुतं, क्ली, ( नियूयते बहुसंख्या प्राप्यतेऽनेनेति । नि+यु+क्त ।) लक्षम् । इत्यमरः । ३ । ५ । २४ ॥ यथा ।"धेनूनां नियुतं प्रादादिति नियुतं लक्षे ।" इति श्रीधरस्वामी ॥

"शतं सहस्रमयुतं नियुतं प्रयुतं मतम् ।
खर्व्वो कोटिरर्व्वुदमिति क्रमाद्दशगुणोत्तरम् ॥
इति रत्नकोषः ।" इति भरतः ॥ दशलक्षम् । यथा,—

"एकं दश शतञ्चैव सहस्रमयुतन्तथा ।
लक्षञ्च नियुतञ्चैव कोटिरर्व्वुद एव च ॥
वृन्दः खर्व्वो निखर्व्वश्च शङ्खपद्मौ च सागरः ।
अन्त्यं मध्यं परार्द्धञ्च दशवृद्धा यथोत्तरम् ॥"
इति पुराणम् ॥

नियुद्धं, क्ली, ( नि+युध्+क्त । ) बाहुयुद्धम् । इत्यमरः । २ । ८ । १०६ ॥ ( यथा, हरिवंशे । १४२ । ७१ ।
"नियुद्धकुशलान् मल्लान् देवो मल्लप्रियस्तदा ।
योधयित्वा ददौ भूरि वित्तं वस्त्राणि चात्मवान् ॥" )

नियोगः, पुं, ( नि+युज्+घञ् ।) अवधारणम् । इति दुर्गादासः ॥ ( निश्चयः । यथा, रघुः । १७ । ४९ ।
"तत् सिषेवे नियोगेन स विकल्पपराङ्मुखः ॥")
आज्ञा । इति हेमचन्द्रः । २ । १९० ॥ ( यथा, रामायणे । २ । २१ । ४९ ।
"त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।
पितुर्नियोगे स्थातव्यमेष धर्म्मः सनातनः ॥"
अपुत्रस्यापत्नीपुत्रार्थं नियोजनम् । यथा, मनुः । ९ । ६२ ।
"विधवायां नियोगार्थे निर्वृत्ते तु यथाविधि ।
गुरुवच्च स्नुषावच्च वर्त्तेयातां परस्परम् ॥" )

नियोगी, [ न् ] त्रि, ( नियोगोऽस्त्यस्येति । नियोग+इनिः ।) नियोगविशिष्टः । नियुक्तः । तत्पर्य्यायः । कर्म्मसचिवः २ आयुक्तः ३ व्यापृतः ४ । इति हेमचन्द्रः । ३ । ३८३ ॥ (यथा, राजतरङ्गिण्याम् । ६ । ८ ।
"लब्ध्यधाचत्वसुतृष्ण्य क्षात्यं नाशन्नियोगिनाम् ॥" )

नियोग्यः, त्रि, (नियोक्तुमर्हः । नि+युज+ण्यत् ।) नियोगार्हः । प्रभुः । इति मुग्धबोधव्याकरणम् ॥ ( यथा, प्रद्युम्नविजये । ५ अङ्के ।
"एते वयं नियोज्या नियोजयतु नियोग्यः ॥")

नियोजनं, क्ली, ( नि+युज+ल्युट् । ) नियोगः । ( यथा, महाभारते । १२ । ३६४ । २ ।
"स्मरणीयोऽस्मि भवता संप्रेषणनियोजने ॥")
प्रेरणम् । यथा । त्वयैतत् क्रियतामिति क्रियासु नियोजनं प्रेरणम् । इति दुर्गादासः ॥

नियोज्यः, त्रि, ( नियोक्तुं शक्यः । नि+युज+"प्रयोज्यनियोज्यौ शक्यार्थे ।" ७ । ३ । ६८ । इति ण्यत्प्रत्ययेन निपातनात् साधुः ।) प्रेष्यः । किङ्करः । इत्यमरः । २ । १० । १७ ॥ ( यथा, भागवते । ४ । १२ । २८ ।
"निशम्य वैकुण्ठनियोज्यमुख्ययो-
र्म्मधुच्युतं वाचमुरुक्रमप्रियः ॥"
नियोजनीये, त्रि । यथा, महाभारते । १२ । ३२७ । ४९ ।
"न नियोज्याश्च वः शिष्या अनियोगे महाभये ॥" )

नियोद्धा, [ ऋ ] पुं, ( नियुध्यते इति । नि+युध+तृच् ।) कुक्कुटः । इति राजनिर्घण्टः ॥ बाहुयुद्धकारी च ॥

निरक्षदेशः, पुं, ( निरक्षो देशः । ) अक्षदेशः । पलभाशून्यस्थानम् । स तु पूर्व्वे भद्राश्ववर्षे यमकोटिः । दक्षिणे भारतवर्षे लङ्का । पश्चिमे केतुमालवर्षे रोमकः । उत्तरे कुरुवर्षे सिद्धपुरी । एताः भूवृत्तपादविवराः अन्योऽन्यं प्रतिष्ठिताः । तासामुपरितो विषुवस्थो दिवाकरो याति । तासु विषुवच्छाया ध्रुवस्योन्नतिश्च न दृश्यते । तत्र दिवामानं रात्रिमानञ्च त्रिंशन्नाडिकाः । इति सूर्य्यसिद्धान्तमतम् ॥ ( यथा, सिद्धान्तशिरोमणौ गोलाध्याये । १५ ।
"निरक्षदेशात् क्षितिषोडशांशे
भवेदवन्ती गणितेन यस्मात् ॥")

निरङ्कुशः, त्रि, ( निर्नास्ति अङ्कुश इव प्रतिबन्धको यस्य । ) अनिवार्य्यः । बाधाशून्यः । इति जटाधरः ॥ ( यथा, भागवते । १ । १७ । १५ ।
"अनागःस्विह भूतेषु य आगस्कृन्निरङ्कुशः ।
आहर्त्तास्मि भुजं साक्षादमर्त्त्यस्यापि साङ्गदम् ॥" )

निरञ्जना, स्त्री, ( निर्नास्ति अञ्जनमिव अन्धकारो यत्र ।) पूर्णिमा । इति शब्दमाला ॥ (निर्नास्ति अञ्जनं यत्र । ) अञ्जनशून्ये, त्रि ॥ ( निर्गतं अञ्जनमिवाज्ञानं यत्र । अज्ञानरहिते च । यथा, देवीभागवते । १ । १८ । ३६ ।
"स कथं बध्यते ब्रह्मन्निर्व्विकारी निरञ्जनः ॥"
पुं, योगिविशेषः । यथा, हठयोगप्रदीपिकायाम् । ७ ।
"कानेरी पूज्यपादश्च नित्यनादो निरञ्जनः ॥"
महादेवः । यथा, हरिवंशे भविष्यपर्व्वणि । १४ । २ ।
"दीर्घरोमा दीर्घसंज्ञो दीर्घबाहुर्निरञ्जनः ॥")

निरतं, त्रि, (नि+रम+क्तः ।) नियुक्तम् । यथा । दानरत्नाकरे देवलः ।
"एकां शाखां सकल्पां वा षड्भिरङ्गैरधीत्य च ।
षट्कर्म्मनिरतो विप्रः श्रोत्रियो नाम धर्म्मवित् ॥"
इति व्यवहारतत्त्वम् ॥

निरन्तरं, त्रि, (निर्नास्ति अन्तरं यस्मिन् यस्माद्वा ।) निविड़म् । घनम् । इत्यमरः । ३ । १ । ६६ ॥ अनवकाशः । (यथा, आर्य्यासप्तशत्याम् । ४३८ ।
"सज्जनयोः स्तनयोरिव निरन्तरं सङ्गतं भवति ॥")
अनवधिः । अपरिधानम् । अनन्तर्धानम् । अभेदः । अतादर्थ्यम् । अच्छिद्रम् । (यथा, कुमारसम्भवे । ५ । २५ ।
"शिलाशयायामनिकेतवासिनीं
निरन्तरास्वन्तरवातवृष्टिषु ॥" )
अविना । अवहिः । अनात्मीयम् । अनवसरः । अमध्यम् । अनन्तरात्मा । एते निरुपसर्गपूर्व्वकान्तरशब्दार्थाः ॥

निरन्तराभ्यासः, पुं, ( निरन्तरः सततोऽभ्यासो यत्र ।) स्वाध्यायः । इति त्रिकाण्डशेषः । सततावृत्तिश्च ॥

निरपत्रपः, त्रि, ( निर्गता अपत्रपा लज्जा यस्येति । ) धृष्टः । निर्लज्जः । इति जटाधरः ॥ ( यथा, भागवते । ३ । २० । २४ ।
"ततो हसन् स भगवानसुरैर्निरपत्रपैः ।
अन्वीयमानस्तरसा क्रुद्धो भीतः परापतत् ॥" )

निरपेक्षः त्रि, ( निर्गता अपेक्षा यस्य । ) अनपेक्षः । यथा, मलमासतत्त्वे ।
"अभिधातुं पदेऽन्यस्मिन् निरपेक्षतया श्रुतिः ॥"
( यथा, रामायणे । ६ । ६६ । ४२ ।
"कलत्रनिरपेक्षैश्च चेष्टितैरस्य दारुणैः ॥" )

निरयः, पुं, (निरस्तः अयो गमनं यत्र ।) नरकः । इत्यमरः ।१।८।१ ॥ (यथा, हरिवंशे ।१६ । १६ ।
"कथञ्च शक्ताः स्म दातुं निरयस्थाः फलं पुनः ॥")

निरर्गलः, त्रि, ( निर्नास्ति अर्गलमिव प्रतिबन्धको यत्र । ) अनर्गलः । अबाधः । इत्यमरः । ३ । १ । ८३ ॥ (यथा, महाभारते । ७ । ६ । ६२ ।
"दशाश्वमेधानाजह्रे स्वन्नपानाप्तदक्षिणान् ।
निरर्गलान् सर्व्वमेधान् पुत्त्रवत् पालयन् प्रजाः ॥")

निरर्थकं, त्रि, (निर्गतोऽर्थो यस्मात् । कप् ।) निष्फलम् । तत्पर्य्यायः । मोघम् २ । इत्यमरः । ३ । १ । ८१ ॥ विफलम् ३ । इति जटाधरः ॥ ( यथा, भागवते । ४ । १६ । २६ ।
"अयन्तु साक्षाद्भगवांस्त्र्यधीशः
कूटस्थ आत्मा कलयावतीर्णः ।
यस्मिन्नविद्यारचितं निरर्थकं
पश्यन्ति नानात्वमपि प्रतीतम् ॥" )

निरवः, पुं, ( नि+रु+"ऋदोरप् ।" ३।३।५७ । इति भावे अप् । ) गौरवः । रवाभावः । इति निपूर्व्वरुधातोरलि निष्पन्नः । अपालनञ्च ॥ (निर्गतरक्षकः । यथा, ऋक्संहितायाम् । १ । १२२ । ११ ।
"नभो जुवो यन्निरवस्य राधः ।"
"निरवस्य निर्गतरक्षकस्य ।" इति तद्भाष्ये सायनः ॥)

निरवग्रहः, पुं, ( निर्गतोऽवग्रहः प्रतिबन्धो यस्मात् । ) स्वतन्त्रः । इत्यमरः । ३ । १ । १५ । (यथा, हरिवंशे । ८० । ६ ।
"इर्द्दमः कामचारी च स केशी निरवग्रहः ॥")
इष्टिप्रतिबन्धाभावश्च ॥ (महादेवः । यथा, महाभारते । १३ । १७ । ८२ ।
"नीलस्तथाङ्गलुब्धश्च शोभनो निरवग्रहः ॥")

निरवहालिका, स्त्री, (निर्+अव+हल+ण्वुल् । टापि अत इत्वम् ।) प्राचीरम् । इति शब्दमाला ॥